लावनं चीरसर्पिर्भ्यां पानञ्च चीरसर्पिषोः ।
चीरपिष्टैस्तिलैः स्वेदो जीवनीयैश्च शस्यते ॥
भृङ्गराजरसच्छागचीरतुल्यार्कतापितः ।
सूर्य्यावर्त्तं निहन्त्याशु नस्येनैव प्रयोगराट् ॥*॥
अर्द्धावभेदके पूर्व्वं स्नेहस्वेदौ हि भेषजम् ॥
विरेकः कायशुद्धिश्च धूपस्निग्धोष्णभोजनम् ।
विडङ्गानि तिलान् कृष्णान् समान् पिष्ट्वा
विलेपयेत् ॥
नस्यं वाप्याचरेत्तस्मादर्द्धभेदं व्यपोहति ।
पिबेत् सशर्करं चीरं नीरं वा नारिकेलजम् ॥
सुशीतं वापि पानीयं सर्पिर्व्वा नस्ततस्तयोः ॥"
नस्ततः नासिकया पिबेदित्यन्वयः । तयोः सूर्य्यावर्त्तार्द्धभेदयोः ॥ * ॥
"अनन्तवाते कर्त्तव्यः सूर्य्यावर्त्तहितो विधिः ।
शिराव्यधश्च कर्त्तव्योऽनन्तवातप्रशान्तये ॥
आहारश्च प्रदातव्यो वातपित्तविनाशनः ।
मधुमस्तकसंयावघृतपूर्व्वैर्व्विशेषतः ॥"
संयावः पक्वान्नविशेषः । एरकिया इति लोके । स च मधुमस्तकः मधुनोपलिप्तः । घृतपूरोऽपूपः ।

"पथ्याक्षधात्री रजनी गुडूची
भूनिम्बनिम्बैः सगुडः कषायः ।
भ्रूशङ्खकर्णाचिशिरोऽर्द्धशूलं
निहन्ति नासानिहितः चणेन ॥"

इति पथ्यादिक्काथः ॥ * ॥

"दार्व्वी हरिद्रा मञ्जिष्ठा सनिम्बोशीरपद्मकम् ।
एतत्प्रलेपनं कुर्य्याच्छङ्खकस्य विनाशयेत् ॥
शीततोयाभिषेकश्च शी लचीरसेवनम् ।
कल्कैश्च चीरवृचाणां शङ्खके लेपनं हितम् ॥"
सर्व्वेषु ।
"यष्टीमधुकमाषः स्यात् तुर्य्यांशन्तु विषम्भवेत् ।
तयोश्चूर्णन्तु सूक्ष्मं स्यात्तच्चूर्णं सर्षपोन्मितम् ॥
नासिकाभ्यन्तरे न्यस्तं सर्व्वां शीर्षव्यथां हरेत् ।
दृष्टप्रयोगो योगोऽयमनुभाविभिराहृतः ॥
आर्द्रं यच्छक्तिकाचूर्णं चूर्णितं नवसादरम ।
उभयं योजितं गन्धात्तस्य नश्यति शीर्षरुक ॥"
इति भावप्रकाशे शिरोरोगाधिकारः ॥

**शिरोऽर्त्तिः**, स्त्री, (शिरसोऽर्त्तिः ।) शिरःपीड़ा । इति लोके प्रसिद्धिः ॥ (यथा, कथासरित्सागरे । १३ । १५२ ।
"जागरेणातिपानेन शिरोऽर्त्तिं व्यपदिश्य च ।
प्रातः स तस्थौ वस्त्रेण वेष्टयित्वाङ्कितं शिरः ॥")

**शिरोवल्ली**, स्त्री, (शिरसो वल्लीव ।) बर्हिचूड़ा । इति शब्दचन्द्रिका ॥

**शिरोवृत्त**, क्ली, (शिर इव वृत्तम् ।) मरिचम् । इति राजनिर्घण्टः ॥

**शिरोवृत्तफलः**, पुं, (शिरसि वृत्तं फलं यस्य ।) रक्तापामार्गः । इति भावप्रकाशः ॥

**शिरोवेष्टः**, पुं, (शिरो वेष्टयतीति । वेष्ट + अच् ।) उष्णीषः । इति त्रिकाण्डशेषः ॥

**शिरोवेष्टनं**, क्ली, (शिरो वेष्टयतीति । वेष्ट + ल्युः ।) शिरःप्रावरणम् । पागड़ी इति भाषा । तत्पर्य्यायः । उष्णीषः २ वेष्टनम् ३ वेष्टकम् ४ । इति शब्दरत्नावली ॥ शिरोवेष्टः ५ चेलोष्णुकः ६ । इति त्रिकाण्डशेषः ॥

**शिरोऽस्थि**, क्ली, (शिरसोऽस्थि ।) मस्तकास्थि । माथार खुलि इति भाषा । तत्पर्य्यायः । करोटिः २ शिरस्त्राणम् ३ शीर्षकम् ४ । इति राजनिर्घण्टः ॥

**शिल**, श उञ्छे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) उञ्छ उद्धृतशस्यशेषाहरणम् । श, शिलति धान्यं दीनः । शेलिता । इति दुर्गादासः ॥

**शिलः**, पुं, क्ली, (शिल + कः ।) उञ्छः । इति मेदिनी ॥ (यथा, भागवते । ११ । १७ । ४१ ।
"मन्याभ्यामिव जीवेत शिलैर्वा दोषदृक्
तयोः ॥")
जीवनोपायविशेषः । यथा,—
"ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा ।
सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन ॥
ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ।
मृतन्तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ॥"
इति मानवे ४ अध्यायः ॥
"अबाधितस्थानेषु पथि वा क्षेत्रेषु वा अप्रतिहतावकाशेषु यत्र यत्रौषधयो विद्यन्ते तत्र तत्राङ्गुलीभ्यां एकैकं कणं समुच्चयित्वा इति बौधायनदर्शनात् । एकैकधान्यादिगुड़कोच्चयमुञ्छः । मञ्जर्य्यात्मकानेकधान्याच्चयनं शिलः । उञ्छश्च शिलश्च इत्येकवद्भावः । तत् सत्यसमानफलत्वादृतमित्युच्यते ।"इति तट्टीकायां कुल्लूकभट्टः ॥ ( रघुवंशीयपारियात्रनृपपुत्त्रः । यथा, रघुवंशे । १८ । १७ ।
"तस्याभवत् सूनुरुदारशीलः
शिलः शिलापट्टविशालवक्षाः ॥")

**शिलगर्भजः**, पुं, पाषाणभेदनः । इति राजनिर्घण्टः ॥

**शिला**, स्त्री, पाषाणः । (यथा, मनौ ) २ । २०४ ।
"गोऽश्वोष्ट्रयानप्रासादस्रस्तरेषु कटेषु च ।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च ॥")
द्वाराधःस्थितदारु । इत्यमरः ॥ स्तम्भशीर्षम् । मनःशिला । इति मेदिनी ॥ कर्पूरः । इति राजनिर्घण्टः ॥

**शिलाकर्णी**, स्त्री, (शिलेव कर्णः कोणो यस्याः । ङीष् ।) शल्लकीवृक्षः । इति शब्दचन्द्रिका ॥

**शिलाकुट्टकः**, पुं, (शिलां कुट्टयति दारयतीति । कुट्ट + ण्वुल् ।) टङ्कः । इति शब्दरत्नावली ॥

**शिलाजं**, क्ली, (शिलाया जायते इति । जन + डः ।) शैलेयम् । इति शब्दचन्द्रिका ॥ लौहम् । इति राजनिर्घण्टः ॥

**शिलाजतु**, क्ली, (शिलाया जतु ।) पर्व्वतजातोपधातुविशेषः । शिलाजित् इति हिन्दीभाषा । तत्पर्य्यायः । गैरेयम् २ अर्थ्यम् ३ गिरिजम् ४ अश्मजम् ५ । इत्यमरः ॥ शिलाजम् ६ अगजम् ७ शैलम् ८ अद्रिजम् ९ । इति रत्नमाला ॥ शैलेयम् १० शीतपुष्पकम् ११ । इति शब्दचन्द्रिका ॥ शिलाव्याधिः १२ । इति त्रिकाण्डशेषः ॥ अश्मोत्थम् १३ अश्मलाक्षा १४ अश्मजतुकम् १५ जत्वश्मकम् १६ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । रसायनत्वम् । मेहोन्मादाश्मरीशोफकुष्ठापस्मारनाशित्वं च । इति राजनिर्घण्टः ॥ अपि च । शर्करासर्व्वरोगहरत्वम् । योगवाहित्वम् । अत्युष्णशीतकत्वञ्च । इति राजवल्लभः ॥ अस्योत्पत्तिनामलक्षणगुणाः ।
"निदाघे घर्म्मसन्तप्ता धातुसार धराधराः ।
निर्यासवत् प्रमुञ्चन्ति तच्छिलाजतु कीर्त्तितम् ॥
सौवर्णं राजतं ताम्रं आयसं तच्चतुर्विधम् ।
शिलाजत्वद्रिजतु च शैलनिर्यास इत्यपि ॥
गैरेयमश्मजञ्चापि गिरिजं शैलधातुजम् ।
शिलाह्वं कटुतिक्तोष्णं कटुपाकं रसायनम् ॥
छेदि योगवहं हन्ति कफमेदोऽश्मशर्कराः ।
मूत्रकृच्छ्रं चयं श्वासं वाताशार्शांसि
पाण्डुताम् ॥
अपस्मारं तथोन्मादं शोथकुष्ठोदरक्रिमीन् ।
सौवर्णन्तु जवापुष्पवर्णं भवति तद्रसात् ॥
मधुरं कटुतिक्तन्तु शीतलं कटुपाकि च ।
राजतं पाण्डुरं शीतं कटुकं स्वादुपाकि च ॥
ताम्रं मयूरकण्ठाभं तत्तिक्तं लवणं भवेत् ।
विपाके कटुकं शीतं सर्व्वश्रेष्ठमुदाहृतम् ॥"
इति भावप्रकाशः ॥

**शिलाञ्जनी** स्त्री, (शिलामञ्जयतीति । अञ्ज + ल्युः । स्त्रियां ङीप् ।) कालाञ्जनीवृक्षः । इति राजनिर्घण्टः ॥

**शिलाटकः**, पुं, (शिलामटतीति । अट + ण्वुल् ।) अट्टः । बिलम् । इति मेदिनी ॥

**शिलात्मजं**, क्ली, ( शिलाया आत्मजमिव । ) लौहम् । इति राजनिर्घण्टः ॥

**शिलात्मिका**, स्त्री, मूषा । इति शब्दचन्द्रिका ॥

**शिलाद्द्रुः**, पुं, (शिलाया दद्रुरिव । ) शैलेयम् । इति राजनिर्घण्टः ॥

**शिलाधातुः**, पुं, ( शिलानां धातुः । ) सितोपलः । इति त्रिकाण्डशेषः ॥ खड़ा इति भाषा ॥ गैरिकभेदः । स तु पीतवर्णः । इति राजनिर्घण्टः ॥
"सितोपलः शिलाधातुर्व्वर्णरेखा च मक्कलम् ।
शिलाधातुविशेषस्तु विज्ञेयो लोकशास्त्रतः ॥"
इति शब्दरत्नावली ॥

**शिलापट्टः**, पुं, ( शिलायाः पट्टः । ) पेषणार्थशिला । शिल् इति भाषा । इति केचित् ॥

**शिलापुत्त्रः**, पु, (शिलायाः पुत्त्र इव ।) पेषणयोग्यशिला । लोड़ा इति भाषा । तत्पर्य्यायः । घर्षनालः २ शिलापुत्त्रकः ३ । इति शब्दरत्नावली ।

**शिलापुष्पं**, क्ली, (शिलायाः पुष्पमिव । ) शैलेयम् । इति राजनिर्घण्टः ॥